णाय दक्षिणां दद्यात्। कृशरधान्ययवतिलमाषशरावान् नापिताय दद्यात्। इति चूडाकरणं समाप्तम् ॥" इति भवदेवभट्टः ॥

चूडामणिः, पुं, (चूडा शिरोभूषणं मुकुटकिरीटादिकम्। तत्र स्थितो मणिः। शाकपार्थिवादिवत् समासः।) शिरोरत्नम्। (यथा, महाभारते। १। ११६। ३८।
"ततश्चूडामणिं निष्कमङ्गदे कुण्डलानि च॥"
चूडायामग्रभागे मणिरिव यस्य।) काकचिञ्चाफलम्। इति मेदिनी। णे, ६४ ॥ योगविशेषः। (स तु ग्रहणकाले एव भवति।) यथा गारुडे।
"सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा।
चूडामणिरयं योगस्तत्रानन्तं फलं स्मृतम्।
अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत्॥"
इति तिथ्यादितत्त्वम् ॥
शुभाशुभगणनाविशेषः। तस्य विवरणं गरुड़पुराणे २०५ अध्याये द्रष्टव्यम् ॥ * ॥ वङ्गदेशीयपण्डितानामुपाधिश्च ॥

चूडाम्लं, क्ली, (चूडायां अग्रभागे अम्लो यस्य।) वृक्षाम्लम्। इति राजनिर्घण्टः ॥

चूडालं, क्ली, (चूडा अस्त्यस्य। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ९६। इति लच्।) मस्तकम्। इति शब्दरत्नावली॥ चूडायुक्ते त्रि। इति हेमचन्द्रः॥ (यथा, महाभारते। १०। ७। ३७।
"चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः॥")

चूडाला, स्त्री, (चूडा शिखा अस्त्यस्याः। "प्राणिस्थादातो लजन्यतरस्याम्।" ५।२।९६। इति लच्। ततोऽजादित्वात् टाप्।) उच्चटाख्यम्। इत्यमरः। २। ४। १६०॥ श्वेतगुञ्जा। नागरमुस्ता। इति राजनिर्घण्टः॥

चूडावान्, [त्] (चूडा अस्त्यस्य। चूडा+मतुप्। मस्य वत्वम्।) चूडाविशिष्टः। इति चूडालाशब्दार्थे मेदिनी। ले, ९०॥

चूण, क सङ्कोचे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) तालव्यवर्गाद्यादिः। षत्वखरी। क, चूणयति चक्षुः सङ्कुचितं स्यादित्यर्थः। इति दुर्गादासः॥

चूतः, पुं, (चूष्यते पीयते इति। चूष+कर्म्मणि क्तः। पृषोदरादित्वात् षलोपः। रसालत्वादेवास्य तथात्वम्।) आम्रवृक्षः। इत्यमरः। २। ४। ३३॥ (यथा, रामायणे।३।७६।१७।
"परिचुम्बति संविश्य भ्रमरश्चूतमञ्जरीम्।
नवसङ्गमसंहृष्टः कामी प्रणयिनीमिव॥"
च्योतति चरति शोणितादिकमस्मादिति। चुतक्षरणे+बाहुलकात् अपादाने क्तः दीर्घश्च।) गुह्यद्वारम्। इति शब्दरत्नावली॥ च्युत इत्यपि पाठः॥

चूतकः, पुं, (चूत एव। चूत+स्वार्थे कन्।) आम्रः। कूपकः। इति मेदिनी। के, ९०॥

चूर, ई ङ य दाहे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं सकं-सेट्। (दीर्घी। ङ य, चूर्य्यते वह्निरिन्धनम्। ई, चूर्णः। इति दुर्गादासः॥

चूर्ण, क पेषे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) षत्वखरी। पेषश्चूर्णीकरणम्। क, चूर्णयति शिला। इति दुर्गादासः॥

चूर्णं, क्ली, (चूर्ण्यते पिष्यते यत्। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरजः। तस्य लक्षणं यथा,—
"अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसम्मिता॥
चूर्णे गुड़ः समो देयः शर्करा द्विगुणा मता।
चूर्णेषु भर्ज्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्॥
लिह्याच्चूर्णं द्रवैः सर्व्वैर्घृताद्यैर्द्विगुणोन्मितैः।
पिवेच्चतुर्गुणैरेव चूर्णमालोड़ितं द्रवैः॥
चूर्णावलेहगुटिका कल्कानामनुपानकम्।
पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत्॥"
इति भावप्रकाशः॥ * ॥
चूर्णौषधस्य पूर्णवीर्य्यं षण्मासपर्य्यन्तं तिष्ठति। इति वैद्यकपरिभाषा॥
("कर्षश्चूर्णस्य कल्कस्य गुड़िकानाञ्च सर्व्वशः।
द्रवशुक्त्या स लेढ्यः पातव्यश्च चतुर्द्रवः॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)
आवीर इति ख्यातम्। (यथा, मेघदूते। ७०।
"अर्च्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्रीमूढ़ानां भवति विफला प्रेरणा चूर्णमुष्टिः॥")
पटवासश्चोद इत्यन्ये। इति भरतः॥ गन्धगुँड़ा इति ख्यातम्। इति सारसुन्दरी॥ तत्पर्य्यायः। वासयोगः २। इत्यमरः। २।६।१३४॥ वासयुक्तिः ३। इति मेदिनी। ने,१२॥ गन्धयुक्तिः ४। इति भूरिप्रयोगः॥ पटयुक्तिः ५। इति शब्दरत्नावली॥ (कुङ्कुमादिरजः। यथा, रघुः। ४। ५४।
"अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥")

चूर्णः, पुं, (चूर्ण्यते सम्पिष्यते इति। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरजः। चूर इति गुँड़ा इति फाकि इति च भाषा॥ तत्पर्य्यायः। क्षोदः २। इत्यमरः। २। ८। ९९॥ चूर्णम् ३ रजः ४। इति भावप्रकाशः॥ (यथा, महाभारते। ६। ११८। ३।
"कन्याश्चन्दनचूर्णैश्च लाजैर्म्माल्यैश्च सर्व्वशः।
अवाकिरञ्छान्तनवं तत्र गत्वा सहस्रशः॥")
धूलिः। क्षारविशेषः। इति मेदिनी। ने, १२॥ चूण इति भाषा॥ (यथा,—
"पर्णानि शीर्णवर्णानि सौदन्त्याकर्णलोचने!।
चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!॥")
शेषस्य गुणः। वातश्लेष्ममेदोनाशित्वम्॥ शङ्खचूर्णस्य गुणाः। कटुत्वम्। क्षारत्वम्। उष्णत्वम्। कृमिनाशित्वञ्च। इति राजवल्लभः॥

चूर्णकं, क्ली, (चूर्ण इव कायतीति। चूर्ण+कै+कः।) गद्यविशेषः। यथा,—
"अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥
भवत्युत्कलिकाप्रायं समासाढ्यं दृढ़ाक्षरम्।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम्॥
चूर्णकं यथा। स हि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुराङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशे अवततार।" इति छन्दोमञ्जरी॥ (क्वचित् वृत्तकं इत्यपि दृश्यते॥)

चूर्णकः, पुं, (चूर्णः कायते प्रकाशते इति। कै+कः।) सक्तुः। इति त्रिकाण्डशेषः॥ (षष्टिकः। यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "षष्टिककाङ्गुकमुकुन्दकपीतकप्रमोदककाकलकासनपुष्पकमहाषष्ठिकचूर्णककुरवककेदारकप्रभृतयः षष्टिकाः॥") स्वार्थे के चूर्णशब्दार्थोऽप्यत्र॥

चूर्णकारः, पुं, (चूर्णं क्षारविशेषं करोतीति। चूर्ण+कृ+"कर्म्मण्यण्।" ३। २। १ इत्यण्।) वर्णसङ्करजातिविशेषः। चूणरी इति भाषा॥ स नटकन्यायां पुण्ड्रकाज्जातः। इति पराशरपद्धतिः॥

चूर्णकुन्तलः, पुं, (चूर्णं वासयोगस्तद्युक्तः कुन्तलः। शाकपार्थिवादिवत् समासः।) अलकः। इत्यमरः। २। ६। ९६॥

चूर्णखण्डं, क्ली, (चूर्णाय यत् खण्डम्।) कर्करम्। इति हारावली। २०८॥ काँकर इति घुटिं इति च भाषा॥

चूर्णपारदः, पुं, (चूर्णः पारदस्य। एकदेशिसमासः। पारदजन्यतया एवास्य तथात्वम्।) हिङ्गुलम्। इति राजनिर्घण्टः॥

चूर्णशाकाङ्कः, पुं, (चूर्णं इव शुभ्रः शाकस्तमङ्कते साहश्येन गच्छतीति। अङ्क गतौ+अच्।) गौरसुवर्णशाकम्। इति राजनिर्घण्टः॥

चूर्णिः, स्त्री, (चूर्णयति खण्डयति अशेषपण्डितानां तर्कमिति। चूर्ण+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्। यद्वा, "वृणिपृश्निपार्ष्णीति।" उणां। ४। ५२। इति इः।) पातञ्जलव्याकरणम्। महाभाष्यम्। कपर्द्दकः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ शतसंख्यककपर्द्दकाः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

चूर्णिका, स्त्री, (चूर्णः क्षोदोऽस्यास्तीति। चूर्ण+"अत इनिठनौ।"५। २। ११५। इति ठन्।) सक्तुः। इति भूरिप्रयोगः॥

चूर्णिकृत्, पुं, (चूर्णिं महाभाष्यं करोतीति। कृ+क्विप्।) भाष्यकारः। इति त्रिकाण्डशेषः॥

चूर्णी, स्त्री, (चूर्णिः+"कृदिकारादक्तिनः।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) कपर्द्दकः। इति मेदिनी। णी, १२। नदीविशेषः। सा राणाघाट्टाख्यग्रामसमीपे तिष्ठति॥

चूलः, पुं, (चोलयति पुनः पुनः छेदेऽपि उत्तिष्ठतीति। चुल उन्नतौ+"इगुपधज्ञेति।" ३। १। १३५। इति कः। निपातनात् दीर्घः। यद्वा, चूर्य्यते इति। चूर्+कः। रस्य लत्वम्।)